SRĪ

NĪLAKAṆṬATĪRTHASWĀMICHARYĀ.

BY

KAVĪDĪPA NĀRĀYAṆA VAIDYA,

AND

ŚRĪŚIVAPRASĀDAḤ,

With Introduction by

Mr. K. SANKARA PILLAI.

नारायणकविदीपसङ्कलितपूर्वसर्गाभ्यां

श्रीशिवप्रसादरचितोत्तरसर्गाभ्यां च

सम्पूर्णा.

श्री-रामशर्म-गोविन्दस्थानेश्वराभ्यां चैषा श्रीमच्छिष्य-सुजनप्रोत्साहनेन मुद्रापिता.

Printed by B. R. Ghanekar at the "Nirnaya-sagar" Press, 23, Kolbhat Lane, Bombay, and published by A. Govindam, at Cattānuam Muri, Post Kayangaḷam, District Travankore.

1911.

(*Price 2 s.*)

INTRODUCTION.

It is with a sense of duty rather than with a feeling of mere pleasure that I respond to the call of the authors in presenting before the public this small poem entitled '*Sree Nealakanta ThirthaCharya*'. As a result of the recent revival of Sanskrit study and the consequent researches of Indian Antiquity, the Mental culture which the Aryans had then Comparatively attained to in various departments of Science, art and literature, shines forth in unparelleled splendour and presents a perspective view prominent, wonderful and menacing to any modern scholar who looks back carefully at the phases of ancient India.

The light thrown upon the great mental culture of the Ancient Aryans by the researches of modern scholars interested in the antiquities of India strikes with aim and wonder the most Sceptical of moderns and makes him pause and admire the intellectual Maturity of the very remote and ancient people of India at a time when the forefathers of the pioneers of modern civilisation were sunk in the lowest stages of primitive barbarism. The civilised nations of the world have now begun to recognise the importance of this fact so much so that they do not regard themselves to have completed the necessary course of instruction in several sciences and arts until they have made a comparative study of what our mother India has thought out upon those subjects. The influence direct or indirect of ancient Indian culture may be markedly traced in the development of the most important branches of knowledge for example in the sciences of philology and philosophy and in the arts of Medicine and education.

"The Indians" in the estimation of no less person than Professor MacDonell, "are the only division of the Indo-European family which has created a great national religion—Brahminism—and a great anglo-religion—Budhism" and "has developed *independently* several systems of philosophy which bears evidence of high speculative powers," as a result of which "their intellectual life has all along been dominated by religious thought than that of any other race" and "their literature shows every step in the evolution of religion and philosophy."

As regards the system of education we are glad to note the growing tendency in the Civilised world to realise the beneficial results accruing from a *real* teacher's close intimacy with his pupils. The recent hostel-system much talked of and much fought for by modern educationists is nothing but a later out-growth based upon scientific principles of the ancient custom of the denoted *Brahmachary's* living in the *Guru's Mut.* In such a *Brahmacharyās'rama* the disciple on his part will have deep reverance for his accepted *Guru* and consequently implicit faith in his teachings. The effect of this pure *Guru Bhakthy*—a deep reverance on the part of the disciple to the preceptor—is to engender in the disciple's heart a zeal for knowledge, an enthusiasm for perseverence and a gratification in assimilated study—three essential items, the importance of which can on no account be underrated in any system of education however civilised it may profess to be.

The present *Khandakāvya* (small poem) is the outflow of such pure and real *Guru* Bhakthy filled to the brim in the hearts of two cultured disciples towards their religious preceptor *Brahma Sree Nealakanta Thirtha Swamy* the well known Scholar and *Vedanti* of Kerala It is a biographical sketch of this eminent person in Sans-

krit Verses and consists of two parts each part comprising two sargas respectively. The first part is wholy composed by Srijut M. K. Narayana Pollai poet and Ayurvedic Doctor. I need not dilate upon his literary and poetic talents in as much as he is known as the beloved student so far as the study of Sanskrit is concerned of Old Raja Raja Verma Dev of Parappanad and has already established a reputation in his poetic work entitled "*Sadguru Sarvaswam*" as "*Resikajana Manōrenjanasaralareethy.*" Narayana Kavi the author of the first part describes therein briefly the salient incidents in the life history of the *Guru* from his birth onwards and from the spirit of the *Bhakthi* and the enthusiasm with which he accomplishes this we may be justified in inferring that though he would like to have embellished it with supplementary Sargas of his own, the true spirit of self-renunciation & communion of interest prevailed over him and made him yield to the wishes of his Co-disciple Siva-prasad to finish it. The second part therefore is solely supplementary and describes in detail the *Thirthatanoms*-pilgrimages to the sacred places of India which the Guru to complete his education undertook to perform with the kind permission of his preceptor. That Siva-prasad is also actuated by the same amount of *Bhakthy* pure and sincere and equally skilled in the art of poetic description will be evident from his *Clokas* of the Second part. In addition to the intrinsic merits of the book another noteworthy fact to be mentioned in this connection is that this production is a sure index of the growing recognition of value and importance of true Biographical study the absence of which from our Oriental literatures was a deplorable want keenly felt by modern Scholars.

I shall not be doing full justice to the duty incumbant upon me if I do not here make mention of what little I

know of the *Swami* himself whose life history is the sole theme of the booklet to which these lines serve as a humble introduction. Sree Nealakanta Thirtha is well known to Sanskrit—Knowing-world as a Scholarly poet—a Vedantic philosopher and a Shastraic yogi. Far and wide, outside India his religious songs entitled *Sthavom* and *Sankalpakalpalathika* and the Vedantic verses of his *Swārājya Sarvaswam* have reached and evoked the admiration of the refined scholars everywhere especially in Germany and America. In the art of Ethic poetry he may be regarded as one of the successful successors of Bharthrihari with the distinction that the Spirit of pessimism pervading throughout the latter's works is substituted by the spirit of *Ananda* peculiarly characteristic of the Swamy's having attained Bramhajnana and in philosophical teachings he may be well compared to Rama Krishna Paramahamsa. But in combining philosophy, ethic poetry and true *Sannyasivrithy* I may be permitted to say for certain that our Swami stands in Kerala second to none but *Sree Sankara Charya.* The real worth of the Vedantic works of the Swami lies *par excellence* in that he does not try to mystify things by means of unexplained technical words in his philosophical discussions and he exposes highly philosophical truths by means of common examples which are within the comprehension of any intelligent layman. In "*Swārājyasarvaswam*" for example where the Author explains the attitude of *Virakthy* (renunciation) and its good effects he says.

" भोजनमैथुनमरणाद्यन्ते नृणां भवेन्मतिर्याऽस्त ।
कोऽमुक्तो बन्धनतो यद्येषा सार्वकालिकी भवति ॥ "

How vividly does it bring home to the mind of an ordinary man the real state of *Virakthi* which a so-called Vedantin would naturally expand into quite unitelligible

and cumbrous phraseology. I therefore cannot but take this opportunity of recommending this tiny book entitled *Swarajyasarvaswam* by Shre Nealakanta Thirtha to be read carefully by all those enlightened sons of India who wish to be initiated into the supposed mysteries of the Vedantha—the unshakable edifice of the highly intellectual life that we have inherited from our ancestors. Much thought is now-a-days spent no doubt upon his works and teachings and I sincerely hope that more in futurity will be spent and beneficial results obtained from them in manifold ways by our posterity.

In fine it does much credit to the Swamy and his disciples (though worldly credit or no credit may to such *Aduaithics* be all the same) in publishing these Sanskrit productions which clearly bring to light the part played by Kerala in the revival of Sanskrit literature and the development of thought. In the past, present and future history of India's mental evolution we have every reason to believe that though Kerala is *physically* isolated by the Mountains on one side and the ocean on the other side *mentally* she remains one with India by some mysterious power of the Creator of the Universe and energetically co-operates with India in all her activities for the advancement mental, moral and economical of the fellow beings all over the world.

I conclude by giving expression once more to my sincere hope that this publication will receive a liberal appreciaton in the hands of all modern scholars who take a real interest in the study of India's ancient scripture and sacred literature.

His Highness The Maha Raja's College For Girls
Trivandrum.
26th May 1911.

K. SANKARA PILLAI,
B. A.

श्री.

श्रीनीलकण्ठतीर्थस्वामिकृतग्रंथोपरि प्रख्यातविद्वद्भी रचिताः पत्रिकाः यथा

वैदर्भीवासुदेवाद्यनेकचम्पूनाटकादिकर्तृरसिकविद्वच्छिरोमणिकटथनरेन्द्रराज-श्रीमदुदयवर्मदेवानामियम्

No. $\frac{1293}{1080}$ (I) 26-6-05.

सुहृदः! भवद्भिः सम्प्रेषितं पुस्तकत्रयं ससन्तोषमुररीकृतमनुवाचितं च सकौतुकम्! एतादृशजनतोपकारकरविविधतरपुस्तकप्रकटीकरणबद्धपरिकरितां भवदीयामिमां परमनुमोमुद्मो वयमपि सशिरःकम्पम्-इति

उदयवर्मा.

Seal & Signature.

(II)

FETEHGARH,

25-6-05.

DEAR SIR &. BRO.

I have the pleasure to acknowledge receipt of the following two books with thanks. I am especially grateful to His Holiness Sri Nilakantha Tirtha who has taken the trouble of composing the said books for use of Bhaktas of the age...With brotherly regards.

1. Yogamrita Tarangini,
2. Sri Sowbhagia Lahari.

Yours fraternally,

Pandit SIVADATTA PANDE.

(III)

15th August 1905.

Dear Sir,

Thank you for the kind presentation of your newly published book योगामृततरङ्गिणी. The work itself bespeaks of your ability of composing good verses.

Yours faithfully.

Bimalaprasada Siddhanta Saraswati.

(IV)

23 May 1905.

To Mr. *Nielakanda Yemin; Edappalli*. Mr. Griffith acknowledges with many thanks the receipt of the two books kindly sent by Mr. Nielakanda Yemin.........

R. T. H. GRIFFITH,
M. A; C. I. E.
Kotagiri.

श्रीशैलाब्धीशप्रतिष्ठापिताङ्गमहापाठशालायां संस्कृताध्यापकानां मार्कण्डेयचरितादिनिबंधकृतां वैयाकरणनारायणशास्त्रिणामियम्.

(१) स्वस्तिमदाशीर्वादः सहृदयमैत्रीं चिरं प्रवर्द्धयतु । अद्याहमस्मि कुशली युष्मत्करुणावशादिह हि ॥ (२) भवत्प्रहितपुस्तकत्रयसमागमोत्थां मुदं कथं नु खलु वच्मि हे विबुध नीलकण्ठाभिध । भवत्कृतय आसते बुधजनप्रमोदावहाः सुनिर्वृतिपदप्रदाः पठनकारिणां प्रत्यहम् ॥ (३) नीलकण्ठविबुधेन निर्मितं तेन चैव दयया समर्पितम् । शब्दशुद्धिरससद्गुणाकरं पुस्तकं तदिह मामरञ्जयत् ॥ (४) ज्ञानभक्तिरसवर्द्धकं नृणां नालिकेरपरिपाकरीतिमत् । भावगर्भकपदैरलंकृतं कस्य मानसमिदं न रञ्जयेत् ॥

H. H. Zamurin's College.

A. NARAYAN S'ASTRIAR,
Sanskrit Paṇḍit.

HALLE,
30-1-05.

DEAR SIR,

Permit me to thank you for the copy of the five Vaishnava poems which you have kindly sent me. The third is interesting as a philosophical treatise, and all are remarkable for their religious fervour and earnestness......

Dr. E. Hultzsch Ph. D.
Prof. Halle.

Yours sincerely
(Sd.) E. HULTZSCH.

BAJWADA SHETSERI,
Baroda, 30th March 1910.

SWAMI NILAKANTHA TIRTHA.

DEAR SIR,

I acknowledge with great pleasure the receipt of the books sent by you as a present. The books contain verses—really the work of a great learned Pandit. The lovers of Sanskrit language would indeed derive merit from it. These books are valuable to me as they would be the treasures of my own poor library.

Expressing my thanks for this present.

I remain,
Dear Sir,
Yours faithfully,
NARHARISHANKER
SHIVSHANKER SHASTRI, B. A.
Sanskrit Teacher, Baroda High School

FRANKENMUTH,
MITCH,
September 2nd, 1905.

DEAR SIR,

I cannot describe the delight that I feel over those two most precious booklets of yours which I got yesterday. Being the works as well as the gift of an eminent sage of India, these booklets will always remain priceless treasures of my library. Especially do I value the Yogamritatarangini the subject interests me deeply..........................I thank you a thousand times for your beautiful present.

Yours most truly,
DR. J. J. MEYER,
Prof. Dept. of Sanskrit,
The University of Chicago, U. S. A.

(ख)

दक्षिणापथस्थसरस्वतीगृहमिति प्रसिद्धपन्तलन्तुराजवंशावतंसविद्वन्मूर्धन्य पूर्वाषाढासंभूतश्रीयुत सि. रामवर्मराजानां प्रशस्तिः--

असितगलयतीन्द्र ! त्वत्कृतिः सत्कृताऽलं
जयति कविकुलेन्द्रैः सादरं मेदुरार्था ।
मम नयनपथं च प्रापिताऽद्य त्वयैव
प्रतिनवपदयोगप्रत्तकौतूहलैषा ॥
वैदुष्यं प्रकटीकृतं परमहो सीमातिगामि त्वया
सर्वस्मिन्विषयेऽप्यनन्यकवितावैदग्ध्यसाधारणम् ।
तत्तद्व्याकरणप्रयोगपरमप्रौढिप्रकाशोदया-
त्किञ्चिज्ज्ञैर्मनसापि दुर्ग्रहतरा सैषा कृतिस्ते यतः ॥ २ ॥
सुप्तिङन्तपदचित्रमेलनमहत्तरार्थघटनाविधि-
स्फारपाटवहठाद्विपाटितकवीन्द्रगर्वगिरिकूटकः ।

अद्य सम्यगिह मामकीनहृदि भूरिमोदपरिवर्द्धन-
स्त्वं हृदाऽसि मम पण्डितप्रकरमस्तकस्थितिमनीयथाः ॥ ३ ॥
योगाभ्यासविधानमार्गपरमप्रावीण्यमप्युच्चकै-
स्तत्तद्दैवतभक्तिपूर्वकमहास्तोत्राणि चाहो तव ।
अद्वैताध्वनि सर्वलोकगहने सञ्चारचातुर्यकं
सर्वं चैतदनन्यसूरिसुलभं वर्वर्ति सर्वोपरि ॥ ४ ॥
प्रतिपत्रप्रेषणे तु विलंबोऽकारि यन्मया ।
तत्कारणं शृणुष्वाद्य वक्ष्ये सौजन्यभूषण ॥ ५ ॥
त्वन्निर्मितप्रचुरपद्यमहार्थचिन्ता-
जाजायमानरसपायससिंधुमग्नः ।
तज्जन्यकोमलतरङ्गगणापविद्धः
कालस्य किञ्चिदपि नैव गतिं व्यजानाम् ॥ ६ ॥
पुस्तकस्य त्रयं त्वादौ लब्धमद्य चतुष्टयम् ।
देवस्तुतिज्ञानयोगप्रश्नोत्तरमनूल्कटम् ॥ ७ ॥
त्वद्वासदेशानभिज्ञं संशेते स्म मनो मम ।
किंनामकं कथं वा ते हस्तस्थं च भवेदिति ॥ ८ ॥
संपूर्वाजन्तशीङ्धातुः सुबन्तो मा स्पृशेद्यथा ।
तथा विविच्य वक्तव्यं सर्वं च प्रेरणान्मम ॥ ९ ॥

(ग)

महाराज राजश्री-

वि.ए.वि.एल्. विरुदशालिविद्वद्वर एस्.-वेङ्कटरमणार्यमहोदयानां प्रशस्तिः—

आर्याः श्रीनीलकण्ठयमिवर्याः ॥

सविनयनतिशतनिचितं तत्रभवत्प्रीतयेऽस्तु पत्रमिदम् ।
श्रीवेङ्कटरमणेन प्रणयपुरस्कारतो लिखितम् ॥ १ ॥
अतियाताः षण्मासाः प्राप्य भवत्प्रेषितं हि कोशयुगम् ।
कार्यभरात्प्रतिलेखे क्षन्तव्यमिदं महन्ममालस्यम् ॥ २ ॥
विज्ञानौन्नत्यवतां सकलकलारत्नशिखरिणां भवताम् ।
काव्ये गुणदोषाणां सर्षपतुल्यो विवेचने कोऽहम् ॥ ३ ॥

श्रीनीलकण्ठकृपया हरिभक्तिमरन्दपूरिता काँचित् ।
सौभाग्यबहुललहरी श्रीयोगामृततरङ्गिणी स्रवति ॥ ४ ॥
श्रुतिमधुराणि नितान्तं सपदि ज्ञानप्रदानि परिशील्य ।
रचनानि तत्रभवतां सम्मोदसमुद्रमग्नोऽहम् ॥ ५ ॥
बलवत्तमा हि वाञ्छा तथापि मे मानसेऽस्ति विज्ञातुम् ।
विदितोऽभूवं कथमिति तादृक्षाणां महीयसां भवताम् ॥ ६ ॥
भाग्यविशेषोऽकाण्डे कला वा कुमुदबन्धुचूडस्य ।
मध्यस्थसत्तिमणेर्वा कस्यापि भवेदनुग्रहाद्देतत् ॥ ७ ॥
सौहार्दमत्रभवतामुपलभ्यानन्दतुन्दिलं स्वान्तम् ।
लेखप्रतिलेखमुखाद्विवर्धतां तदिति शङ्करं नौमि ॥ ८ ॥

Triplicane, Madras:
22nd March 1906. (Sd.) S. BENKATARAMANAN.

To

SWAMI NILAKANTA TIRTHA.

HALLE 25. 3. 10.

DEAR SIR,

Permit me to thank you very sincerely for your two new Compositions श्रीकण्ठामृतार्णव and स्वाराज्यसर्वस्व.........and to congratulate you on the successful way in which you are continuing theological research and writing classical Sanskrit verse in this practical and unpoetical age.

DR. E. HULTZSCH, PH. D

Prof. HALLE,

Germany

श्रीनीलकण्ठतीर्थस्वामिविरचितः

श्रीबाहुलेयस्तवः ।

ऐश्वर्यमप्रतिममत्रभवान्कुमारः
सर्वत्र चावहतु नः करुणापणः सः ।
येनात्मवल्लपितभाग्यपरार्ध्यभूमिः
स्वाराज्यसम्पदपि शश्वदहो सनाथा ॥ १ ॥

श्रीस्कन्दकल्पविटपी कुरुतात्सबाह्य-
माभ्यन्तरं च विभवं युगपत्सदा नः ।
दृग्व्याप्तिप्रतिमितिं भ्रमरावलीं यो
नित्यं बिभर्ति करुणामकरन्दपुष्टाम् ॥ २ ॥

भद्रं क्रुषीष्ट नितरामिह सैद्धसेनी
सानुग्रहप्रकृतिनेत्रपरम्परा नः ।
मोहान्धकूपपतितेऽव्यभिचारतो द्राग्
या दोरकीभवति तत्पदबद्धचित्ते ॥ ३ ॥

विद्या चतुर्दशतयी शरजन्मनाम्नि
यस्मिन्नु पर्यवसिताऽव्यवधानतो नः ।
पुष्णातु सैष सकलासु कलासु दाक्ष्यं
चिन्तामणिप्रतिभटीभवदंघ्रिरेणुः ॥ ४ ॥

सिद्धसेनस्य—स्कन्दस्य—इयम् ॥ २ समुद्धरणोपयोगिरज्जुरितिभावः ॥

षाण्मातुरस्सितवलच्छरदागमो मे
प्रज्ञासरोवरमलं विमलं दधातु ।
येनात्र सच्चितिसुखैकरसात्मचन्द्रं
साक्षात्करोत्वनिदमात्मतयाऽयमेव ॥ ५ ॥

दद्युः श्रियस्त्रिभुवनाद्भुतवस्तुवार्द्धि-
मंथाद्रिविभ्रमपटूनि गुहेक्षणानि ।
स्तन्यावसानसमये निजमातृवक्त्र-
पद्मे भ्रमद्भ्रमरिकालघुमंथराणि ॥ ६ ॥

नैसर्गिकी यदपि भिन्नपुमाश्रयात्वं
वाचः श्रियस्तदपि यत्करुणाकटाक्षः ।
सूतेऽन्वहं निजजनेषु रविप्रभेव
श्लिष्टे नुमः परमकारुणिकं गुहं तम् ॥ ७ ॥

प्रत्यक्तया श्रुतिपुराणवचोनिगुंफ-
स्तात्पर्यवान्भवति वर्णयितुं यमर्थम् ।
श्रेयांसि नैकविधया प्रकटं विदध्या-
त्सैषोऽग्निभूरिह परार्थसमुद्यमेषु ॥ ८ ॥

नैयत्यतो हृदि पदं स तनोतु बाल-
चर्यः स्थितिं य इह साक्षितयापि धत्ते ।
एवं च चुञ्चरणितत्पदचित्रगूत्था
संवित्तिदीपकलिकाखिलदीपिका स्यात् ॥ ९ ॥

---

१ बालचर्यः सिद्धसेन इति त्रि० शे० ॥ २ चित्रगुरुत्तराराणिः । 'ज्ञानं कृत्वा तु चित्रगुं' द० मु० उप० ॥

यस्मिन्मनागपि मनः प्रणिधाय काय-
व्यूहादिसर्वविभवं प्रतिपद्यते ना ।
योगेश्वरेश्वरमितः कृकवाकुकेतुं[1]
भक्त्या व्रजामि शरणं करणैस्त्रिभिस्तम् ॥ १० ॥

शब्दानुशासननयव्रतिनो[2]ऽत्र वर्ण-
व्यङ्ग्यस्ततो भवति योर्थ इवातिरिक्तः ।
स्फोटः स एष इति यं कथयंति नित्यं
कुर्मस्तमेव हृदि षण्मुखनामधेयम् ॥ ११ ॥

मार्गान्तरोक्त[3]विधया परमाणुवर्गे-
ष्वाद्यं समुन्मिषति जन्तुकृतेन कर्म ।
यस्मात्मसंविदुदयस्य विभोः सिसृक्षा-
वेलासु नौमि परकारुणिकं गुहं तम् ॥ १२ ॥

यद्यत्र पूरयति ते चरणानुषङ्ग-
स्तत्तद्ध्यनुद्भवपराहतमेव विघ्नः ।
वस्त्वीप्सितं क्वचिदपीशतनूज तस्मा-
न्नेत्रामृतप्रभ दृशोर्विषयस्त्वमेधि ॥ १३ ॥

वाचस्पतिप्रमुखवागपि यत्र कुण्ठी-
भावं प्रयाति तमिति प्रणुवन्न लज्जे ।
त्वद्भक्तिभारमुखरीकरणान्मृषित्वा
स्वामिन्विधेहि तदपीह कृपार्द्रदृष्टिम् ॥ १४ ॥

---

१ 'कृकवाकुध्वजश्च सः' पु० दे० ॥ केतुरिति कविरूढ्या ॥ २ वैयाकरणाः॥-
३ वैशेषिकोक्तनयतः ॥

कालत्रयेऽपि करणत्रयसम्पदे नः
सर्वोत्तमत्वत इहाभिमतं तवापि ।
यद्यद्धि तत्तदखिलं करुणांबुवारि-
वाहाशु मे वितर हे भगवन्नमस्ते ॥ १५ ॥
श्रीवाहुलेयस्तवमुत्तमं यः
पठेत्प्रभाते प्रयतः स धीमान् ।
वागर्थविज्ञानधनाढ्यतामे-
त्यन्ते विशोकं पदमभ्युपेयात् ॥ १६ ॥
अस्मोह्स्वामिपादाब्जमरन्दरसशीलिनः ।
श्रीनीलकण्ठतीर्थाख्यस्येदं स्वामिसमर्पणम् ॥ १७ ॥

नमोगुहाय । ॐ ॥

इति श्रीमद्वाहुलेयस्तवः सम्पूर्णः ॥

---

१ 'कुमारस्तु स्वामी द्वादशलोचनः' त्रि० शे० ।

श्रीरस्तु ।

श्रीनीलकण्ठतीर्थस्वामिचर्यामृतम् ।

आत्माश्रमो जयति नाम यतीन्द्रमौलिः
श्रीनीलकंठवरनामगतीर्थपादः ।
यत्सूक्तिसंभृतसुधां सुधियो विभाव्य
वैराग्यभक्त्यमृतरूपरसावसिक्ताः ॥ १ ॥

सच्चित्परामृतरसप्रसरप्रमोद-
सान्द्रावबोधपरिनिर्मलशान्तचेताः ।
तीर्थाग्रणीरखिलजीविकुलानुकम्पा-
सम्पन्महोदधिरसौ भुवनं पुनाति ॥ २ ॥

ऋण्यब्धिशून्यहिमदीधितिमेतु[1] योऽब्दे
कोळंबगे दिवसनाथ उदक्पथस्थे ।
फुल्लानदीपरिसरेऽतिसमृद्धधिष्ण्ये
कस्मिंश्चनाल्पजनतापरिवेष्टितेऽथ ॥ ३ ॥

सार्द्धैकयोजनसमन्तरिते च शंक-
राचार्यपादभगवद्गृहतोऽग्निकोणे ।
श्रीवञ्चिभूवलरिपोर्विषयेषु जन्म
सन्मङ्गलोदयनिदानमवाप भाग्यात्[2] ॥ ४ ॥

श्रीकश्यपान्वयजपुण्यफलत्वतो ज्ञ-
वृन्दारविन्दमिहिरासितकण्ठनाम्नः ।

---

१. ७–,४–,०–,१=1047M.E. २ श्रीमच्छात्रादीनामित्याशयः ॥

प्रादुर्बभूव हि गुणोल्लसितान्तरः क-
त्याण्यङ्कमातरि शशीव स दुग्धसिंधौ ॥ ५ ॥

लग्नं ह्यभून्मिथुनमुच्चगतो द्वितीये
वाचस्पतिर्वृषभगौ रविभूमिजौ च ।
कीटे च चन्द्रशिखिनौ धनुषीनसूनु-
रेकादशे बुधकवी किल तत्प्रसूत्याम् ॥ ६ ॥

आदौ स्वकीयपितृपादसकाशतोसा-
वन्यूनसत्त्वगुणशोभनभावरम्यः ।
विद्यां क्रमात्कतिपयैर्दिवसैरधीतः
सामान्यतः कुशशिखाशितधीः कुमारः ॥ ७ ॥

श्रीमाटराष्ट्रपरिशोभितराजकीय-
पाठालयादिषु पुनः स महामनस्कः ।
दुर्गाह्यमांग्लरचितागमसंचयं स-
मभ्यस्तवान्सकलसज्जनपूजनोत्कः ॥ ८ ॥

अत्रान्तरे शमनिधेः शठकोपनामा-
चार्यस्य तार्किकमणेर्द्रविडोद्भवस्य ।
संसर्गतः सदुपदेशशतैः प्रपञ्च-
निःसारताद्यवगमश्च बभूव तस्य ॥ ९ ॥

तातार्यपादवचसाऽऽहतसाधुचर्या-
मर्यादया च परितोषितसर्वलोकः ।
शश्वत्स ईश्वरपदांबुजभक्तिमुच्चै-
रच्छिन्नपूर्वसुकृतप्रकरः प्रपेदे ॥ १० ॥

पुण्यांवुधिर्गुरुजनाननुमोदितं स
हूणोक्तिपाठविषयाद्विरराम धैर्यात् ।
ऊरीचकार निजदिष्टबलेर्यमाणो
मान्यं च राजपुरुषत्वमिवाल्पकालम् ॥ ११ ॥

कालेऽत्र चामरविवेकमुखान्कथंचि-
दभ्यस्य कं च हृदि बोधविशेषमाप ।
सन्मन्त्रशास्त्रनिवहावगमे स धीमा-
नुद्योगशक्तिमकरोद्गुरुपादसेवी ॥ १२ ॥

आर्षाणि मन्त्रपटलानि पुनः प्रपञ्च-
साराद्यनेकविधतंत्रसमीरितानि ।
अन्यानि वेदविहितानि च भव्यभव्या-
न्यभ्यस्तवानयमभग्नमनाः सदैव ॥ १३ ॥

ख्यातिं दधौ जगति गारुडिकादिवृत्त्या-
मत्यादराद्विषहरान्बहुसिद्धमन्त्रान् ।
अव्याजभक्त्यजपदक्षरलक्षसंख्य-
मक्षामदाक्ष्यमवलंव्य स कर्मदक्षः ॥ १४ ॥

क्लेशापहा विषहरा अपि ते हि मन्त्रा-
स्तेषां निरन्तरजपाहुतिमुख्ययोगात् ।
भस्मीवभूवुरिह जन्मशतार्जितानि
पापानि तस्य पुरुनिर्मलभावुकस्य ॥ १५ ॥

प्रश्नोत्तरैर्बहुतरैः शठकोपसंज्ञ-
नैयायिकेन सह संशयितानिवृत्तिः ।

नैकेषु तत्त्वविषयेषु तदा तदासी-
दासन्नमोक्षसरणेरसकृच्च तस्य ॥ १६ ॥
रन्ध्रैर्विना न खलु लौकिकमित्यभेद्यं
बोधं समेत्य बहुतीर्थकृतः सरंश्च ।
ऐच्छत्स निर्मलतमात्परमार्थनिष्ठा-
दाचार्यतः कमपि सान्द्रमयोपदेशम् ॥ १७ ॥
काले ततः सकलनैगमपारदृश्वा
बालाभिधः स भगवान्करुणापयोधिः ।
मेघो हि चातकशिशोरिव तस्य जन्म-
बन्धाभितापशमनाय बभूव दैवात् ॥ १८ ॥
उल्लाघतामलघुदुःखसहं शरीरं
संशुद्धसाधनचतुष्टयसम्पदाप्तिम् ।
आलोक्य योगसरणेः परिशीलनाय
शिश्वर्थनाममुनि रत्नममुं न्ययुंक्त ॥ १९ ॥
विद्यापरः स उपविंशवयास्तदानीं
प्राप्तप्रदीप्तधिषणाविभवप्रकाशः ।
आरब्ध चावहिततामवलंब्य योगा-
भ्यासं गुरुप्रवरदर्शितवर्त्मनाथ ॥ २० ॥
मुद्राविधिं परमचिद्रससिद्धिखेटं
भाग्यांबुधिः सलिलबस्तिमुखाः क्रियाश्च ।
रम्याणि चासनमुखान्यनुशीलयन्स
युक्तान्तरोऽथ च हठाभिधमाप योगम् ॥ २१ ॥

पश्चात्स्वदेशिकवरात्परमात्मसंवि-
त्साम्राज्यदानकुशलान्स समेत्य मार्गान् ।
तत्रैकताननियमान्नचिरात्प्रपेदे
विश्रान्तिमात्मनि हतप्रतिबन्धबन्धम् ॥ २२ ॥

वर्षप्रमाणमपि चागमयुक्तिबाध्ये-
ऽस्मिन्मानसे जगति दोषधिया सचेताः ।
आवर्तयन्स परचिद्गतपञ्चकाल-
ध्यानं तदैव मनसस्तनुतां च लेभे ॥ २३ ॥

प्रारब्धवेगवशतस्तदपीह तस्य
शास्त्रान्तगत्यभिरुचिर्हृदयेऽत्यरुक्षत् ।
संक्षिप्तसारमथ नैषधमभ्रदूतं
नारायणार्चकगुरोर्मुखतः पपाठ ॥ २४ ॥

वैराग्यतो नु बहुशास्त्रदिदृक्षया नु
विक्रीय शृंखलमथांगुलिमुद्रिकाश्च ।
क्रीतांस्तदेति यदनेन निबन्धराशि-
रन्यानपेक्षमुचितं हि तदीदृशानाम् ॥ २५ ॥

भूयोपि भट्टिकृतकाव्यमुखान्हठांग-
ग्रन्थाननेकमतशास्त्रचयान्गुणाब्धिः ।
पश्यन्हठं च नियमेन यथागमं स
कुर्वन्नगर्वितमना रमते स योगी ॥ २६ ॥

रामानुजीयनयदीक्षितपण्डितेन्द्रा-
च्छ्रीकृष्णमानवगुरोर्द्विजतां प्रपन्नात् ।

काश्यां सुरेश्वरकृतिं भगवद्भिरस्ता-
स्ताः काव्यनाट्यविधिसद्रचनाश्च [1]सोऽध्यैत् ॥ २७

शास्त्राधिकारपरिपूर्णदशानवास्या
भट्टोजिदीक्षितकृतामनु कौमुदीं सः ।
मुक्तावलीमथ पपाठ शिरोमणिं ता
व्याख्यास्तयोरुपरिगाश्च मनोरमाद्याः ॥ २८ ॥

नागेशभट्टरचितामधिगत्य लव्वीं
मञ्जूषिकां तदनु शाब्दिकभूषणादिम् ।
आर्डेत्युपाह्वकथकेश्वरटिप्पणिं च
धीस्तस्य शारदशशीव परं चकाशे ॥ २९ ॥

पातञ्जलाम्बुधिमसौ हरिवद्धसेतुं
संदृश्य चाथ बहुभाट्टमुखान्प्रबन्धान् ।
वेदान्तशास्त्रनिचयानखिलानपाठी-
च्छारीरकं तदनु शांकरभाष्यमन्यत् ॥ ३० ॥

षट्छास्त्रपारगमनिर्वचनीयसर्व-
स्वादीन्कथंचिदनुनीय निजात्मदेवम् ।
श्रीसंयुतार्यगुरुपादमथोऽध्यगच्छ-
त्तत्त्वप्रदीपकमसौ लघुचंद्रिकां च ॥ ३१ ॥

दासार्यकेवलशिशुद्विजमुख्यमित्र-
वर्गादथैकगुरुकाच्युततत्त्वनिष्ठात् ।
ग्रन्थान्सुदुर्लभतरान्स समेत्य दूरा-
त्कृच्छ्रं गुरूननुसरन्पदमाप तेषु ॥ ३२ ॥

---

१. 'राघवीय–माघ–वसुमतीविक्रम–शाकुंतल–काव्य (प्रकाश)–दर्पणादयः।'

श्रीमत्फणीन्द्रमुखभाष्यसुधांबुराशि-
पारंगतः सुगुणिनां प्रथमं गणेयः ।
विद्यासु तस्य विदधे स च तत्र तत्र
साहायकं हरिहरात्मजकृष्णशास्त्री ॥ २३ ॥

नारायणार्य इति विश्रुतनामधेयो
विद्यापरः सकलसद्गुणरत्नराशिः ।
अन्योऽभवत्पुनरमुष्य सकृत्यनिष्ठा
हृद्या विशेषविभवा यदनुग्रहोत्थाः ॥ २४ ॥

तस्यात्मवत्कुलमणेर्गुरुवन्मता स-
द्ग्रन्थेष्वहं पदद्दढप्रतिपत्तिकृत्ये ।
सा संहिता जयति सूतमुखोत्थितेदं-
मिथ्यात्वबोध इव वाल्मिकिमोक्षकाण्डः ॥ २५ ॥

सा प्राकृताऽऽन्तरविभागयुता महारा-
ष्ट्राख्या परा तदनु हिन्द्यथ दाक्षिणात्या ।
वङ्गान्ध्रगूर्जरमुखा द्रमिलोद्भवाद्या
ज्ञाता हि तस्य लिपयो बहुलाः सभाषाः ॥ २६ ।

श्रीकण्ठभक्तजनपूजनबद्धदीक्षः
शैवागमोक्तविषयात्मकलासु दक्षः ।
अर्भाह्मुन्यभिमतः शिवरामवृक्षः
सौजन्यभूर्जयति तस्य सतीर्थ्यपक्षः ॥ २७ ॥

तस्यात्मनि स्थिरतरां परमात्मनिष्ठां
दृष्ट्वाप्यपायरहितां महितां मनस्वी ।

आत्माश्रमं तमथ सद्गुरुराचचक्षे
प्रेक्षावदग्र्यमणिरर्थवतैव नाम्ना ॥ ३८ ॥
श्रीवाग्भवप्रमुखमंत्रविशेषजाप-
साचिव्यसद्गुरुकृपार्द्रदृगन्तपातात् ।
आत्माश्रमाह्वयमुनिर्हठराजविद्या-
सौधाधिरोहणविधिं कृतवान्सुधीन्द्रः ॥ ३९ ॥
शिश्वर्थनामभगवद्यतिराजराज-
कारुण्यदृङ्मिलदनुग्रहवैभवेन ।
विद्यापरः स परयोगिपदं प्रपन्नो
धन्यो विभाति जगतीह सदेहमुक्तः ॥ ४० ॥
महामनुजपानुसेवननिदानसद्वासना-
बलेन सकलागमाध्ययनभावनेनापि च ।
निरर्गलगलत्सुधारसधुरंधरां भारतीं
स्फुरत्परचिदन्वितां स कविताकलास्वकलयन्मुनिः ॥ ४१ ॥
यदीयवदनोदराद्वहति साधु सारस्वती
रसप्रसरनिर्झरी परतुरीयसाक्षात्करी ।
अधीतसकलागमो यमिकुलोत्तमोत्तंसको
लसत्त्वसितकण्ठतीर्थगुरुरत्र मन्मानसे ॥ ४२ ॥

इति वैद्योपाह्वनारायणकविदीपकृतायां तीर्थचर्यायां ।

प्रथमाचर्या ।

---

१ एते ग्रंथरचनायां तत्रभवद्भिरभीख्यस्वामिभिर्नियुक्ताः सन्तः प्रवृत्ताः ।

अथ द्वितीयाचर्या ।

वाग्देवता विविधहृद्यकलाविलासा
तस्याननांबुरुहरंगतले सलीलम् ।
नित्यं मुमुक्षुजनतानुजिघृक्षयेव
नृत्यं चकार बहुधा त्रिजगन्नटी सा ॥ १ ॥

मायामोहांधकारान्तरितलघुदृशां घोरसंसारतापो-
त्तप्तानां प्रेमभक्तिप्रदविमलगभीरप्रमेयान्प्रबन्धान् ।
वेदान्तस्थाननेकान्यदिह मुनिवरो निर्ममे निर्ममात्मा
भूयो भूतानुकम्पामृतविसरसरस्वत्तरंगान्तरंगः ॥ २ ॥

शमादिसम्पद्युक्तेभ्यः सज्जनेभ्यो दयानिधिः ।
ज्ञानयोगोपदेशं च चकार स मुनीश्वरः ॥ ३ ॥

श्रीरामशर्मेति गृहीतनामा
ब्रह्मामृताख्यो गुणिवत्सलश्च ।
सच्छास्त्रयोगांगनिविष्टदृष्टि-
र्जयत्यलं तेषु विरागपात्रम् ॥ ४ ॥

स्वीकृत्यादौ गृहस्थाश्रमविधिमतुलस्वप्रतापैर्जनानां
रक्षां काले विधाय क्षितिधरणि यशश्चन्द्रिकां संवितत्य ।
साधूनामर्थिनां चेतसि विपुलतरां तृप्तिमुत्पाद्य सङ्ग-
त्यागात्संप्राप्तसौख्यः सकलविभवसौभाग्यलक्ष्मीसमेतः ॥ ५ ॥

स्फायच्छ्रेयस्करश्रीचरणयुगलपाथोजसेवासपर्या-
सातत्यातिप्रसन्नान्तरगुरुवरकारुण्यपीयूषपात्रम् ।

---

१ एतत्प्रणीता बहवो ग्रंथा देवनागर-ग्रंथलिप्यादिषु मुद्रिता वितीर्णाश्च सन्त्यधः ।

उन्मीलद्ब्रह्मनिष्ठो निगमशिखरविद्वीरचूडामणिर्गो-
विन्दस्थानेश्वरः प्रोल्लसति वरगुणो 'ब्रह्मपूर्वानुभूतिः' ॥ ६ ॥

बाह्यान्तरोत्कलितनिस्तुललेखयोग्य-
मौन्यांबुधिर्भुवि गुणापण एव साक्षात् ।
विद्यापरो विजयते स 'शिवप्रसादः'
श्रीमान्समूर्त इव देशिकदृक्प्रसादः ॥ ७ ॥

सज्जनविहगाश्रयपादपतामाप्तो महामतिप्रवरः ।
पुरुमालभाभिख्यश्वेतोहरवृत्तभासुरोस्त्यपरः ॥ ८ ॥

भासमानगुणपूर्णशेवधि-
र्योगवान्सकलसाधुसम्मतः ।
शाश्वतं जिगमिषुः परं पदं
शान्तधीर्जयति शंकरार्भकः ॥ ९ ॥

कर्तेत्युपाधिकलितो नितरां बुधेन्द्रा-
नानन्दयञ्जयति सान्द्रपदावलोकी
नारायणाह्वयमनीष्यपरोतिमात्र-
सौजन्यवान्विबुधवाक्तरुणीभुजङ्गः ॥ १० ॥

यद्वक्त्रांबुरुहात्समस्तजनतानन्दप्रदानक्षमा
प्रौढार्था कविता मधुद्रवमयी निर्याति साधीयसी ।
गैर्वाण्यांग्लवचोविलासजलधिक्रीडारसज्ञो महा-
प्रज्ञो राजति कृष्णदेशिकवरः सच्चिद्रसास्वादकः ॥ ११ ॥

माधवमौनी सुजनाभरणः श्लिष्टगुणोस्त्यमलान्तःकरणः ।
देशिकचरणांभोरुहशरणः संततसंवितपरचित्स्मरणः ॥ १२ ॥

---

१ अयं 'शङ्करमंदारक' प्रभृतिग्रंथप्रसाधकोऽनेकनिबंधकर्ता च ।

साऽन्याऽनन्ना प्रसन्ना संततपरिलसद्ध्यानयोगानुषक्ता-
जीवन्मुक्ताऽऽत्मयोगिन्यतिमृदुमधुरस्वच्छनम्रस्वभावा ।
यच्छिष्योधीश्वरात्मा परिहृतविषयो दैवताचार्यपूजा-
निष्णातः शांतचेताः कुशलमनुभवत्यात्मविद्याभिलाषी ॥१३

भ्रूमध्यध्यानयोगामलमतिरधिका ज्ञानविद्याधनौघे
दानोत्कर्षा परं पण्डितवरनिकरैर्माननीया विनीता ।
वेदान्तव्यालगव्याघ्रतिशुधितहृदंभोरुहा सापि चिन्म-
ञ्जर्याख्येमां धरित्रीं कलयति विलसन्मण्डनां चैवमन्या ॥१४

महामतिः शास्त्रविशेषदर्शी वेदान्तवैदग्ध्यधुरं दधानः ।
स चादिनाथार्य इति प्रतीतो बुधः समिन्धे सुगुणैकसिन्धुः ॥१५

राजाधिकारधुर्यो धीराग्र्यः सद्गुणज्ञमौलिमणिः ।
सद्गुरुपादसरणो नारायणपोतनागपो जयति ॥ १६ ॥

ब्रह्मानुचिन्तनपरो गुणगृह्णुर्वेदपाठनिष्ठात्मा ।
माहावालाख्येयः पण्डितलोकानलंकरोति सुधीः ॥ १७ ॥

आर्याग्लगीःप्रवीणा विज्ञानादत्तलोकतत्त्वार्थाः ।
विजयन्ते ब्रह्मपरा धीराग्र्याः कृष्णपाठकाभिख्याः ॥ १८ ॥

---

१. 'एषाऽऽत्मपंचक–स्तवमालादिकर्त्री । एतत्प्रशंसाकर्तारो बहवः । तत्र कस्यचिन्मान्यमहाशयस्यायं श्लोकः—इहसांगवेदपरिभाषिपूरुषाधिकदुर्लभात्मयमनादिसत्कृताम् । अवलोक्य तत्पदद्दशात्मयोगिनीं परमाशिषैव घटये शिरो धुवन् । इत्याद्याः ॥ २ देवीयं सुप्रसिद्धा–, गीतमञ्जर्यादिबहुग्रंथकर्त्री च । तत्रैतस्याः पद्यम् । यथा—,जन्मादिरस्य यत ओः परमेशितुः स्याद्ब्रह्मादयोपि च यदंघ्रिरजोविशुद्धाः । श्री राजते यदुरसीह शिवानि नित्यं नोदन्तलीशपुरवासिहरिः स दद्यात् । (श्रीचिन्मञ्जरी ।)

शक्तिहस्तपरमेश्वराश्रमा वेदमूर्धपरिनिष्ठिताशयाः ।
साधुभावगुरुसारसम्पदः सन्ति सज्जनमनः प्रसादकाः ॥१९॥

सौशील्याद्यन्वितौ हंसपद्मनाभाभिधौ तथा ।
गुरुदेवार्चकौ साधू विद्येते ब्रह्मचिन्तकौ ॥ २० ॥

गुरुशास्त्रभक्तिरसिकास्तत्सेवाविधुतकल्मषप्रज्ञाः ।
नारायणनाथाख्याः सन्त्येवं स्वात्मलाभहतबाधाः ॥ २१ ॥

श्रीमद्गुरुप्रवरपूर्णकटाक्षदृष्टौ
विद्यापरावपि च केशवचित्प्रकाशौ ।
रागादिशात्रवबहिष्करणेन शान्त-
स्वांतौ सुखेन चरतः सुजनावतंसौ ॥ २२ ॥

लसतः पुनरार्य-देवभक्तौ
परविद्यानिरतौ सुनित्यनिष्ठौ ।
गुरुदैवतभक्तियोगदार्ढ्या-
न्नितरां मुक्तिपदावसन्नवृत्ती ॥ २३ ॥

श्रुत्वाचार्यमुखाच्छ्रुतिं बहुतरां स्वारब्धवेगोदया-
त्कोप्यप्राप्तपदो विरोचन इव प्रज्ञातिदौष्ट्यात्स्थितः ।
निःसङ्गः सततं प्रयत्नमवलंब्यास्तेऽपि मन्दोपरो
जीवन्मुक्तिपदे सदाश्रय इति व्यक्तं द्रुये धीः कृतम् ॥ २४ ।

एवं गुरोरधिगतामलचित्प्रबोधाः
शिष्याः परःशतमिलावलयं पुनन्ति ।
धन्या प्रशिष्यजनता च परं गभीर-
स्वान्तस्य तस्य महिमा वचसां सुदूरे ॥ २५ ॥

मित्राण्यथो संस्कृतमुख्यभाषा-
सम्राण्महामान्यपदं प्रपन्नः ।
विख्यातनामा सुगुणज्ञमौलिः
स्तोमाशविद्वत्कुलशेखराद्यः ॥ २६ ॥

शास्त्रपारगमतिस्तथा परं
विश्रुतो जयति हुज्कपण्डितः ।
येन चाश्मलिपिजातिरुद्धृता
व्याकृता च बहुभेदभेदिता ॥ २७ ॥

कीलाख्यविश्वविद्यालयस्थ-
संस्कृतगपाठकाग्रसरः ।
सकलकलानिधिरन्यो
मान्योस्ति हि देवसेनसूरिवरः ॥ २८ ॥

बुध-कवि-शिखण्डरत्नमिहान्यसुदुर्लभगुणैकवासगृहम् ।
श्रीकुञ्जिरामवर्माभिधदेवो जयति पांड्यवंशमणिः ॥ २९ ॥

अनन्तविद्यानिधयो मेयरैयन्तपण्डिताः ।
सदग्र्याः श्रुतसद्भावाः सन्ति हि स्निग्धकोटिगाः ॥ ३० ॥

योगाभ्यासावसरे येन बहूपकृत एष शिष्टमणिः ।
तत्पद्मनाभनारायणसंज्ञं साधु विजयतेऽग्र्ययुगम् ॥ ३१ ॥

विघ्नं विनैव लवणोषणलेशवर्जी
स द्वादशाब्दमितकालमिहैकभोजी ।
कल्पान्महामुनिनुतान्महिताननेका-
न्संसेवते स च जितेन्द्रियलोकमौलिः ॥ ३२ ॥

"यातेष्वब्देषु पञ्चस्वपि मितफलमूलाशनः" प्राग्वदेत-
द्धात्मस्थोऽव्याजभक्त्युद्गमपुलकभरैः शिष्यवर्गैश्च नम्रैः ।
नीतः स्वैरं कदाचिद्बहुतरनगरग्रामदेशान्तराणि
स्वामी श्रीकण्ठतीर्थाह्वय इह परमात्याश्रमस्थः पुनाति ॥ ३३ ॥

संसारावर्तराशिभ्रमितविविधसन्तापचिन्तापहारी
सूरीन्द्रः सान्द्रसंवित्परसुखदनयादर्शकः सज्जनानाम् ।
श्रीमद्बालाह्वयस्वाम्यमलचरणपाथोजमाध्वीकपाना-
च्चक्रभ्रान्तं जगत्पश्यति विशयविहीनं सदात्मन्यजस्रम् ॥ ३४ ॥

स्वयंज्योतिर्यत्प्रस्फुरति परमानन्दममृतं
शिवं शान्तं प्रत्यक्स्थितमुदिति नाम्ना व्यवसितम् ।
तदाकारात्मासावसितगलतीर्थाभिधयतिः
सपर्यामादत्ते सकलबुधवर्यैरुपहृताम् ॥ ३५ ॥

सर्वोत्कर्षेण भात्यागमनिवहमहाग्रन्थशालेति विद्व-
ल्लोकैः संस्तूयमानः प्रणतपरिणतज्ञानदानैकतानः ।
संदेहध्वंसितत्त्वव्यवहृतिपथसामञ्जसीमञ्जुसीमा
श्रीनीलग्रीवनामा जनहितकरणो देशिकस्वामिपादः ॥ ३६ ॥

योगाभ्यासविधूतकल्मषहृदब्जान्तः सुषुम्नायन-
प्रोद्गच्छत्फणिनीप्रचालनलगत्सोमामृतासेचनम् ।
सान्द्रानन्दमयं महःसमुदयं स्वात्माख्यमालोकयं-
तोन्तर्निर्हृतवृत्तयः परिलसन्त्यात्माश्रमस्वामिनः ॥ ३७ ॥

कोलंबाब्दे रसवसुनभश्चन्द्रसंख्यां प्रयाते
कुंभस्थेर्के गुरुचरितमुद्धृत्य पक्षेऽवलक्षे ।

अल्पप्रज्ञोप्यहममलचिद्बोधसंप्रेप्सुरन्त-
र्वाण्यर्चायै व्यरचयमिदं देशिकेन्द्रप्रसादात् ॥ ३८ ॥

अद्याधिवञ्चिनृवरावनि राजकीयवैद्यालयाधिपतिभूयमुपाश्रितोहम् ।
श्रीनीलकण्ठयतिवर्यपदारविन्दसंलग्नभृङ्गपृथुकोस्मि तदन्तवासी॥३९॥

यं जानन्त्यगदङ्कारं नारायणममुं जनाः ।
अगदङ्कारयामास तमिदं स्मरणं गुरोः ॥ ४० ॥

मन्मनोगतविमोहतमिस्रोन्मर्दनोद्यतपदोपलदीपः ।
ब्रह्मवर्चसनिधिः[1] स मदन्तर्भातु भातुगुरुदैवतमूर्तिः[2] ॥ ४१ ॥

इति वैद्योपाह्वनारायणकविदीपकृतायां
श्रीनीलकण्ठतीर्थस्वामिचर्यायां
द्वितीया चर्या ॥

(इति प्रथमः खण्डः ।)

१ तपःस्वाध्यायजं यस्य तेजस्तद् ब्रह्मवर्चसमिति कोषः । २ भातुरादित्यः (औणादिकः ॥)

अथ द्वितीयः खण्डः ।

तृतीया चर्या

शिवप्रसादसंकलिता ॥

वाचं परां धेनुमुपास्य सर्वा-
घिष्ठानिकां देशिकतीर्थचर्याम् ।
यत्तोसि कर्तुं गुरुदेवतात्म-
प्रसत्तिरुन्मीलतु सर्वदाऽत्र ॥ १ ॥

विद्वत्प्रकाण्डोसितकण्ठतीर्थस्वामी कदाचित्स्वगुरोरनुज्ञाम् ।
लब्ध्वातिमोदादडयारसंज्ञं ग्रन्थालयं द्रष्टुमनाः प्रतस्थे ॥ २ ॥

दिनान्युषित्वा स सुखेन तत्र स्थितान्यपूर्वाणि विलोक्य देवः ।
शास्त्राणि तत्रत्यसुहृज्जनांश्च संभाष्य तृप्तिं बहुलां प्रपेदे ॥ ३ ॥

श्रीरामकृष्णाख्ययतिं दिदृक्षुर्मठं तदात्वे स तदीयमागात् ।
द्वित्राणि तत्रापि दिनानि नीत्वा काञ्चीं प्रति प्रस्थितिमाततान ॥४॥

अथागताभ्यां विमलप्रसादराजेन्द्रनाथाख्यसुहृद्वराभ्याम् ।
युक्तो हरिं हस्तिगिरीन्द्रनिष्ठं स प्रागददर्शोपनिषत्सु वेद्यम् ॥ ५ ॥

श्रीकामपीठं भुवि सुप्रसिद्धं
स चाभिगम्य प्रणनाम भक्त्या ।
एकाम्रनाथाङ्कविभूतिरास्ते
कामं दुहाना मनुजस्य यत्र ॥ ६ ॥

---

१ "उद्घश्च तल्लजो यष्टिर्मतल्ली च मतर्चिका । मञ्जरी च 'प्रकाण्डश्च' प्रशंसा-वचना इमे" इति श० व्यू० तरङ्गिणी ।

'यत्संविदेकप्रवणस्य कामः
कामाय भूयोपि च कल्पते न ।
कामाक्षितामात्मतयैव योग-
क्षेमाय नित्यं हृदि कुर्महे त्वाम्' ॥ ७ ॥

नुत्वेति तां शङ्करदेशिकेंद्रमर्चामयं भक्तिभराद्यनंसीत् ।
मूर्ध्ना कृतं तस्य मुहुः स्मरन्स पुनः प्रयाणाय मतिं व्यधत्त ॥ ८ ॥

श्रीतीर्थपादोदितचित्सुधायां
मध्येपथं केन च नार्थ्यमानः ।
वैदेशिकोर्थे विमलप्रसाद-
सरस्वती ह्यांग्लगिराचचक्षे ॥ ९ ॥

स कुम्भकोणालयसन्निविष्टमाढौकताढौक्य ननाम देवम् ।
काश्यां कृतं यत्र लुनात्यघं चेत्याभाणकोस्तीह मनुष्यलोकः ॥ १० ॥

भूलोकवैकुण्ठमथोपसन्नः स रङ्गसंज्ञं पुरुषः पुराणः ।
फणीशपल्यङ्कशयश्चकास्ति यत्र श्रुतीनामिव मूर्ध्नि नित्यम् ॥ ११ ॥

रामेश्वरं प्राप पुनः कृतार्थी-
कुर्वन्निवात्मानमिदंप्रणत्या ।
भानौ प्रतीचीं महिलावतंसी-
कर्तुं प्रवृत्ते च स देशिकेन्द्रः ॥ १२ ॥

दिनद्वयं तत्र वसन्स काले ध्यानोपहारेण हृदा तमार्चत् ।
पूजा बहिर्यद्यमिनां निषिद्धा बाह्यार्चनेत्यादिगिराऽऽगमान्ते ॥ १३ ॥

ततः प्रपेदे दिशि दक्षिणस्यां पुरीं प्रसिद्धां मधुरेति नाम्ना ।
उपत्यकायां रजताचलस्य वस्वोकसारेव भुवि द्वितीया ॥ १४ ॥

---

1 वाराणस्यां कृतं पापं कुम्भकोणे विनश्यति इति संवादात् ।

सुहृद्वियुक्तश्च ततः स योगी श्रीसुन्दरेशं प्रणिपत्य भक्त्या ।
इष्टार्थभूकल्पलतां तथा श्रीमीनाक्ष्यभिख्यामथ पुर्युवास ॥ १५ ॥
प्रपूज्यपादेन सह स्थितेस्मिन्नानन्दजी नाम यतिः कदाचित् ।
तद्दर्शनोत्कः पुरमाससाद भेरण्डकुड्यालयनामकं मे ॥ १६ ॥
दिनद्वयं तेन समं न्यवात्सीत्संल्लापमांग्लादिगिरा विधास्यन् ।
सत्संप्रदायानुसृतं शिखादितत्तज्जनस्थानविधां प्रकृत्य ॥ १७ ॥
ततो हृषीकेशपुरात्सुतीर्थादधीतविद्येन सहाप योगी ।
शान्तात्मना तत्र स सङ्गतिं च मैत्रीं शिवानन्दयतीश्वरेण ॥ १८ ॥
स्थलीशयात्रासु कविक्षितीशं[1] श्रीज्येष्ठराजं स ददर्श तेन ।
अमुद्रितग्रंथचयः कृतोऽभूत्तथा तदर्थे धुतबंधनोपि ॥ १९ ॥
महाहिवत्तत्र शयानमाराध्यमीश्वरं कंचिदथाभ्यपश्यत् ।
प्रेष्ठं सुवैयाकरणं स मार्गवशेन नारायणशास्त्रिणं च ॥ २० ॥
अनन्तरं प्राप गुरुः कुमारीतीर्थं तदारभ्य स नान्नभोजी ।
'व्यतीतमद्यावधि वत्सराणां मासोनषट्कं' स्वगुरावथास्त ॥ २१ ॥
मासत्रयं सैष सुखेन नीत्वा श्रीपुण्डरीकं पुरमाससाद ।
यत्राविरास्तेखिलमूललिङ्गमाकाशसंज्ञं खलु भावनार्हम् ॥ २२ ॥
यः सर्ववस्तुप्रतिभासहेतुः कृत्स्नं जगद्व्याप्य दिवि स्थितश्च ।
परेगिरं यन्महिमा स देवः पायादपायादनिशं नटेशः ॥ २३ ॥
इतीडया तत्र हि वासराणि नत्या तथा यापयति स योगी ।
श्रीदण्डपाणिप्रमुखैर्यतीन्द्रैः साकं सुहृद्योग्यकथानकैश्च ॥ २४ ॥
स शास्त्रविद्धूर्जटिदीक्षितादेर्मैत्र्येकपात्रं च बभूव पश्चात् ।
अनेकसद्ग्रंथविवक्तृकुप्पुसाम्याह्वयं तञ्जपुरेप्यदर्शत् ॥ २५ ॥

---

1 नानाविधग्रंथनिर्माणधुरीणं श्रीमानविक्रमकविराजम् ।

नेति पृष्टो विदुषां तु चेष्टा नानेति तेन स्वकृतेन चेति ।
गु... प्रकटेश्वराख्यं तत्रोपगम्याथ नुनाव देवम् ॥ २६ ॥
प्रतिप्रयाणावसरे स आपच्छ्रीसंगमेशं हृदिकृत्य चास्तौत् ।
यत्रादिराजोद्विजतामुपेतो यतिप्रभस्तचुटकंवलाख्यः ॥ २७ ॥
आराध्यपादं पुनरभ्युपेत्य तदंघ्रिपद्मे कृतमस्य जानन् ।
साष्टांगपातं स पपात भक्त्या तथास्थितिं तत्र चकार मासम् ॥२८॥
आत्मीयशिष्येण सहैककेन क्षेत्रं ततः ख्याततरं प्रतस्थे ।
श्रीजंबुकेशं स हि यत्र देवः कृपावलादार्द्र इवास्ति नित्यम् ॥ २९ ॥
पुनः प्रपेदे कमलालयाख्यं क्षेत्रं महापातककूटकापम् ।
स यत्र सङ्कल्पसुरद्रुरन्यः श्रीत्यागराजाकृतिरीश आस्ते ॥ ३० ॥
सर्वप्रपञ्चोपशमं यमाहुर्यः सर्वसिद्धान्तरहस्यभूमिः ।
येनानुविद्धः प्रतिभाति विश्वं देवः शुभं नः सततं क्रियात्सः ॥ ३१ ॥
तमित्युपश्लोक्य जगाम पश्चात्तिरुप्परकुन्नपदं च तत्र ।
दिनान्युषित्वा तत आप स स्वनिवासभूमिं गुरुपादपूताम् ॥ ३२ ॥
निरुपमकरुणापयःपयोधेरिव मथिताद्गलितः कलानिधिर्नः ।
दुरितमपहरेच्छिवं च दद्यात्परमगुरुः स कुमारनामधेयः ॥ ३३ ॥
श्रीनीलकण्ठतीर्थस्वामिकृपावासशेमुषीयोगात् ।
देषानुस्मृतिविभवाच्छिवप्रसादीयमुत्थिता जयतु ॥ ३४ ॥

इति श्रीतीर्थस्वामिचर्यायां

तृतीया चर्या ।

अथ चतुर्थी चर्या ।

किमपीह शिवाभिधं महः प्रकृतिप्रत्यययोगमाश्रितम् ।
मनसा वचसा च सन्दधे नपतद्भाति जगद्यदन्वयात् ॥ १ ॥

यदनुस्मृतिकामधेनवः सुवतेऽविघ्नमशेषवाञ्छितम् ।
वरदं द्विरदाननं भजे तमहं सिद्धिसमृद्धिसेवितम् ॥ २ ॥

अथ वर्षयुगं स योगिराड् गमयित्वाऽब्धिगजाभ्रभूमिते ।
मलयाङ्कशके ययौ दिशं गुरुपादं प्रणिपत्य चोत्तराम् ॥ ३ ॥

अपि पूर्वमितोऽतिनिष्ठया जलमाहारमुपाहरन्स्थितः ।
शिशुशैलमुखेशसद्मगः स तु मासांश्चतुरो महामतिः ॥ ४ ॥

प्रथमं भुवि वङ्कलूरिति प्रथितं मार्गवशेन पत्तनम् ।
इतमप्यमुनाति सम्मदादिति मार्गान्तरयायिनोः श्रुतम् ॥ ५ ॥

ननु वर्त्मनि नस्त्वभेदगीरविनाभावपरेह नापरा ।
अपि सैव भिदागिरा यथातथतोऽस्तीति तु पूर्ववादिनः ॥ ६ ॥

इह भेदमभेदमेकदा द्वयमेकत्र कथं गदस्यये ।
परमार्थदृशाऽभिदा मता समतासुप्तिमुखे तथागतेः ॥ ७ ॥

अथ चात्र समस्य येन वा वद रूपेण भिदाऽ'पि तेन किम् ।
अभिदा' नु तदन्यरूपतः प्रथमे नोभयतैकतास्थितेः ॥ ८ ॥

इति मुख्यविकल्पकल्पनासहताया इदमादृतं कथम् ।
मुनिशापहतस्य दुर्धियोऽशुचि वाक्यं नु वदेति चान्यतः ॥ ९

स ययावथ तुङ्गभद्रया सुरनद्येव च संश्रितं भुवि ।
हरिशङ्करसंज्ञमीश्वरं प्रतितुष्टाव तमित्युदारधीः ॥ १० ॥

संसृतिसागरे परिभ्रमतां भेदमतप्रशान्तये ।
इव बीजमुपात्तमाश्रये परमेकत्वमहंधियां विभुम् ॥ ११ ॥
पुरि तत्र यदृच्छयागतं सविरूपाक्षबुधं ददर्श च ।
स्वकृतिप्रतिपादनान्वितं किमपि स्ववचसाऽभ्यभोपत ॥ १२ ॥
समुपेत्य स पुण्यपत्तनं श्रुतविज्ञानचणैर्नृभिर्वृतम् ।
अथ पण्डितविष्णुशास्त्रिणं सुमतिं तत्र ददर्श चापरान् ॥ १३ ॥
पुरमाप ततः स नासिकां गुरुपुण्याश्रमशोभितां पुरा ।
भगवानपि यत्र तापसीं बहुवर्षावधि वृत्तिमाश्रितः ॥ १४ ॥
अवगाह्य स गौतमीं गतः प्रथमं शङ्करदेशिकाश्रमम् ।
सुगुणज्ञगणेशशास्त्रिणा सह इवग्राघुणिकीभवरिस्थतम् ॥ १५ ॥
तदनु प्रयतो विदेहजानिलयीभूतगुहां प्रविष्टवान् ।
स च पञ्चवटीसमीपगान्बहुभिक्षाशिगृहांश्च संयमी ॥ १६ ॥
मथुरामथ 'स' क्रमाद्धरिः 'प्रतिपन्नो' वसुदेवसद्मनि ।
अवतीर्य च यत्र योगिनां नयनानन्दनचन्द्रमाः स्थितः ॥ १७ ॥
करुणारसवारिवाहविग्रहइन्दिन्दिरलोललोचनः ।
पुरि यत्र हि केशवाख्यया भगवान्सन्निहितोस्ति नित्यशः ॥ १८ ॥
यमुनासलिलं प्रविश्य स ध्रुवघट्टे हरिमात्मना स्मरन् ।
मुदितः स दिदृक्षुरभ्यगाद्भगवत्सूतिनिकेतनादिकम् ॥ १९ ॥
शमनस्वसुराश्रितस्तटेऽथ स वृन्दावननामकं पदम् ।
वृषभानुजया समं स्थितो भगवान्यत्र स आदिपूरुषः ॥ २० ॥
पुनराप स गोकुलं हरिर्बहुधा यत्र तु बाललीलया ।
ससुरासुरमानुषं जगत्परमानन्दजले न्यमज्जयत् ॥ २१ ॥